## पथिमथ्यृभुक्षामात् । (८५/३६५)

पथिन् मथिन् ऋभुक्षिन् इत्येतेषाम[1]ङ्गानां सौ परतः [2]आकारः आदेशो भवति । पन्थाः । मन्थाः । ऋभुक्षाः । स्थानिन्यनुनासिकेऽपि आकारोऽनुनासिको न भवति । [3]भाव्यमानेन सवर्णानां ग्रहणं न भवति इति शुद्धो ह्ययमुच्चार्यते ॥

## इतोऽत् सर्वनामस्थाने । (८६/३६६)

पथ्यादीनाम् [4]इकारस्य स्थाने [5]अकारादेशो भवति [6]सर्वनामस्थाने परतः । पन्थाः, पन्थानौ, पन्थानः । पन्थानम्, पन्थानौ[7] । मन्थाः, मन्थानौ, मन्थानः । मन्थानम्, मन्थानौ । ऋभुक्षाः, ऋभुक्षाणौ, ऋभुक्षाणः । ऋभुक्षाणम्, ऋभुक्षाणौ । आत् इति वर्तमाने पुनर् अद्वचनं षपूर्वार्थम् । ऋभुक्षणम् [8]इत्यत्र 'वा षपूर्वस्य निगमे' (६.४.९/३५४१) इति [9]दीर्घविकल्पः ॥

## थो न्थः । (८७/३६७)

पथिमथोः थकारस्य स्थाने न्थः इत्ययमादेशो भवति सर्वनामस्थाने परतः । पन्थाः, पन्थानौ, पन्थानः । मन्थाः, मन्थानौ, मन्थानः[10] ॥

## भस्य टेर्लोपः । (८८/३६८)

[11]पथ्यादीनां भसञ्ज्ञकानां टेः लोपो भवति । पथः । पथा । पथे । मथः । मथा । मथे । ऋभुक्षः । ऋभुक्षा । ऋभुक्षे । सर्वनामस्थाने इत्यनुवर्तमानमपि विरोधादिह न सम्बध्यते[12] ॥

## पुंसोऽसुङ् । (८९/४३६)

[13]पुंस इत्येतस्य सर्वनामस्थाने परतोऽसुङ इत्ययमादेशो भवति । पुमान्, पुमांसौ, पुमांसः[14] । इह परमपुमान् [15]इति प्रागेव [16]विभक्त्युत्पत्तेः समासान्तोदात्तत्वम्, उत्पन्नायां विभक्तौ [17]असुञ् इत्यनिष्टः स्वरः प्राप्नोति ? तदर्थम् [18]असुङि उपदेशिवद्वचनं कर्तव्यम् । तेन परमपुमान् इत्यन्तोदात्तो भवति । पुमान् इत्ययं पुनराद्युदात्त एव ॥

---

1. अङ्गानाम् नास्ति ब. 2. आत् इत्ययमादेशो क.ब. 3. भाव्यमानोऽण् सवर्णान् न गृह्णाति इति ब.क. इ.ह. 4. अङ्गानाम् इत्यधिकम् क. 5. अत् इत्ययमादेशो भवति ब. 6. सर्वनामस्थाने नास्ति क. 7. एवं सर्वनामस्थाने उदाहार्यम् इत्यधिकम् ह. 8. इति दीर्घविकल्पो यथा स्यात् इ. ह. क. 9. दीर्घत्वविकल्पः ड. 10. पन्थानम् पन्थानौ मन्थानम् मन्थानौ इत्यधिकम् ब.क.ड.इ.ह. 11. पथिमथिऋभुक्षाणाम् इ. 12. पुरस्तात् तु सम्बध्यते एव इत्यधिकम् इ. 13. सर्वनामस्थाने इति वर्तते इत्यधिकम् ब. 14. पुमांसम् । सर्वनामस्थाने इत्येव । पुंसः पश्य इत्यधिकम् इ. ड. 15. इत्यत्र क. 16. च प्रत्ययोत्पत्तेः क. ब. 17. असुञि सति ब. 18. असुङि नास्ति क.